No. २३६३
क

Title पक्षिराज दारुण सप्तकम्

Author

Extent १ पत्र Age

Subject तन्त्र

पाक्षिराज दरुण सप्तक

नं० १३६३

ॐ नमः श्रीशरभेश्वराय ॥ कोपोद्रेकान्तनिर्यन्निटलपरिचरन्वादिनारिप्रभू
तज्वालामालाप्रदग्धस्मरतनुसकलं त्वामहं शाल्वेशं याचेत्वत्पादप
द्मप्रणिहितमनसं द्वेष्टि मां यः क्रियाभिः तस्य प्राणाः प्रयांतु परशिवभव
तः शूलभिन्नस्य तूर्णम् १ शंभो त्वद्धस्तकुंतक्षतरिपुहृदयान्निःसृतवल्लो
हितौघं पीत्वा पीत्वातिदृप्ता दशदिशि विचरंत्युग्रगणाश्चंडमुण्ड्याः गर्जन्त
त्युग्रवेगा निखिलरिपुशिरःखिललोलाः प्रमत्ताः संजप्ते त्वलदेवैः शरभ
खगपते त्राहि नः शाल्वेश २ सर्वाधारं गविष्टं सकललयकरं त्वन्नुरूपं श
रण्यं याचेहं त्वां सपत्नो भवति मुविवेलो द्वेष्टि मां यस्तु तस्य श्रीशंभो त्वत्करा
ब्जस्थितहलकठिनाघात वक्षस्थलस्य प्राणाः प्रेतेशपाशांहतो ग्रहहतकलह
क्रोशपूर्वं प्रयांतु ३ द्विष्मः सोण्याववंयन्नव पदकमलध्याननिर्दग्धपापा
स्तापिक्षेपैर्विमुक्ता विहगकुलपते खलयाबद्धमूर्ते तूर्णं त्वत्पादपद्मप्रणाम
परस्तु नाथ उर्वीकृतागः सद्वेष्टा यातु यामं पुरमतिकलषं कालपाशानुब
द्धः ४ भीमश्रीशाल्वेश प्रणतभयहर प्राणहन्तुर्मदारेः याचेहं त्वास्य गर्वं
प्रशमन निहितस्वेच्छयाबद्धमूर्ते ... स्तुवं देह्याशुप्टकन्दखविलस
द्भीवज्रिकोदरस्य प्राणाः क्रोशप्रसंगात्प्रकटितहृदयस्योग्ररत्नैः प्रयांतु ५
श्रीशूलं ते कराग्रेस्थितमुसलगदावर्तवाताभिघाता ... शिचराश्चाशुनं देव
नानाभूतावेतालपुंजः पिबतु नदाविरुल्लसीतचित्तः प्रमत्तः ६ त्वद्दोर्दण्डोग्र
दंडप्रघटितविनमच्चण्डकोदण्डमुक्तैर्बाणैर्दिव्यैरनेकैः शिथिलितवपुषः
क्षीणकोलाहलस्य शत्रोः प्राणावसानं परशरभरिपोस्त्वन्निदेशप्रभावात्तूर्णं
पश्यामि मां परिहसति कदास्यादिमध्यान्तहेतो ७ इति निशि प्रयतस्तु निरास
नो निजहृदा शिवभावमनुस्मरन् प्रतिदिनं दशधा त्रिदिनाद्रिपोः जयत
नियहृदारुणसप्तकम् ८ इति गुह्यं महावीर्यं परमं रिपुनाशनम् भानुवा
रं समारभ्य मंगलान्तं जपेत्सुधीः इति श्रीआकाशभैरवकल्पे उमामहेश्वरसं
वादे पक्षिराजदारुणसप्तकं समाप्तम् ॥

११ पाताने केः रिपोस्त्वं वदति जवेनोद्धृत
रक्तस्ताई सन्दृष्टाकं रलग्नानि खिलवि
मिरियाता